Roll No. ..................................

# Y–2639

## शास्त्री (द्वितीय वर्षे) परीक्षायाम्, 2015

### "क" वर्गे साहित्य विषये

### पञ्चमं प्रश्नपत्रम्

समयः—घण्टात्रयम् ] [ सम्पूर्णाङ्काः—100

**सूचना** : सर्वे प्रश्नाः समाधेयाः।

1. अधोलिखितेषु कयोः द्वयोः पद्ययोः सप्रसङ्गं व्याख्येयौ— 20

(क) "हरकण्ठ ग्रहानन्द मीलिताक्षी नमाम्युमाम्।
कालकूट विषस्पर्श जातमूर्च्छा गमाभिव॥"

(ख) निर्गतासु न वा कस्य कालिदासस्य सुक्तिषु।
प्रीतिर्मधुरसान्द्रासु मञ्जरीष्विव जायते॥

(ग) रागिणि नलिने लक्ष्मीं दिवसो निदधाति दिनकरप्रभवाम्।
अनपेक्षित गुणदोषः परोपकारः सतां व्यसनम्॥

(घ) योगं स्वप्नेऽपि नेच्छन्ति कुर्वते न करग्रहम्।
महान्तो नाममात्रेण भवन्ति पतयो भुवः॥



http://www.prsunotes.com

http://www.prsunotes.com

2. अधस्तनेषु गद्यखण्डेषु **द्वावेव** सप्रसङ्गं व्याख्येयौ— 40

(क) "अथं तां तथा शप्तां सरस्वती दृष्ट्वा पितामहो भगवान्कमलोत्पतिं-लग्नमृणाल-सूत्रामिव धवलयज्ञोपवितनी तनुमुद्वहन, उदगच्छदच्छाङ्गुलीय-मरकत मयूख लता कलापेन त्रिभुवनोप प्लव प्रशम कुशा पीडधारणेव दक्षिणेन करेण निवार्य शापकलकलम्, अतिविमलदीधैर्माविकृत युगारम्भ सूत्रापातमिव दिक्षु पातयन् दशनकिरणैः सरस्वती-प्रस्थानमंगल पटहेनेव पूरयन्नाशाः स्वरेण सुधीरमुवाच-ब्रह्मन न खलु साधु सेवितोऽयंपन्थाः येनासि प्रवृत्तः। निहन्त्येष परस्तात्।"

(ख) तेषु चैवमुत्पद्यमानेषु-संसरति च संसारे, यात्सु युगेषु अवतीर्णे कलौ, वहत्सु वत्सरेषु, व्रजत्सु वासरेषु, अतिक्रामति च काले प्रसवपरम्पराभिरनवरतमापतति विकाशिनि वात्स्यायन कुलेक्रमेणप्कुवेरनामा वैनतेय इव गुरुपक्षपाती द्विजो जन्म लेभे। तस्या भवन्नच्युत, ईशानो, हर पाशुपतश्चेति चत्वारो युगारम्भा इव ब्राह्म तेजो जन्यमान प्रजा विस्तारा नारायण बाहुदण्डा इव सच्चक्रनन्दकास्तनयाः। तत्र पाशुपतस्यैक एवाभवत् भूभार इवा चलकुलस्थिति, चतुरुदधि गम्भीरोऽर्थपतिरिति नाम्ना समग्राग्र जन्मचक्रचूडामणिर्भहा त्याः सूनुः। सोऽजनयद्-मृगु हंसं शुचि कवि महीदत्तं धर्म जातवेदसं चित्रभानुं त्र्यक्षं महिदत्तं, विश्वरूपं च एकादश रुद्रानिव पवित्रान् पुत्रान्। अलमत च चित्रभानुस्तेषां मध्ये राजदेव्याभिधानायं ब्राह्मण्यां बाणमात्मजम्।



http://www.prsunotes.com

http://www.prsunotes.com

(ग) सा त्वादीति्-आर्य, श्रोष्यसि कालेन। भूयसो दिवसानत्र स्थातुमभिलषति नौ हृदयम्। अल्पीयांश्चायमध्वा परिचय एव प्रकटीकरिष्यति। आर्येण न विस्मरणीयोऽयमनुषङ्गदृष्टो जनः इत्याभिधाय तूष्णीमभूत। दधीचस्तु नवाम्भोभरगंभीराम्भोधर ध्वान निभया भारत्यानर्त्तयन्व नतता भवनभाजो भुजंगाभुजः सुधीरमुवाच—आर्य करि्ष्यति प्रसादमार्याराध्यमाना। पश्यामस्तावतातम् उतिष्ठ! ब्रजाम! इति।

(घ) राजा तु तच्छ्रुत्वा दृष्ट्वा च तं गिरिगुहा गत सिंह बृंहतगम्भीरेण स्वरेण पूरयन्निव नभोभागमपृच्छत् एस स बाणः ? इति। यथाऽऽज्ञापयति देव सोऽयम् इति। विज्ञापितो दौवारिकेण न तावदेनमकृत प्रसाद पश्यामि इति। तिर्यङ्नीलधवलांशुक धारातिरस्करिणीमिव भ्रमयन्।

3. सरस्वती च सावित्र्याश्चरित्रचित्रणं चित्रयतु। 15

**अथवा**

प्रथम उच्छ्वासस्य कथासारो लेख्यः।

4. बाणोच्छिष्टं जगत् सर्वम्। 15

**अथवा**

ग्रन्थकारस्य परिचयो देयः।

5. कहाकवेर्बागभट्टस्य वंशवर्णनं वर्णयत। 10

**अथवा**

गद्यं कवीनां निकषं वदन्ति।



http://www.prsunotes.com

http://www.prsunotes.com